# ŚRĪMAD BHAGAVAD GĪTĀ

## CHAPTER 15 - The Supreme Spirit

| | |
|---|---|
| ॐ श्री परमात्मने नमः | Om Śrī Paramātmane Namaḥ |
| अथ पञ्चदशोऽध्यायः | Atha Pañcadaśo'dhyāyaḥ |
| पुरुषोत्तम योगः | Puruṣottama Yogaḥ *(optional)* |

| | |
|---|---|
| श्रीभगवानुवाच | Śrībhagavānuvāca |
| ऊर्ध्वमूलमधःशाखम् | ūrdhvamūlamadhaḥśākham |
| अश्वत्थं प्राहुरव्ययम्। | aśvatthaṁ prāhuravyayam, |
| छन्दांसि यस्य पर्णानि | chandāṁsi yasya parṇāni |
| यस्तं वेद स वेदवित्॥ १॥ | yastaṁ veda sa vedavit. (1) |
| अधश्चोर्ध्वं प्रसृतास्तस्य शाखाः | adhaścordhvaṁ prasṛtāstasya śākhāḥ |
| गुणप्रवृद्धा विषयप्रवालाः। | guṇapravṛddhā viṣayapravālāḥ, |
| अधश्च मूलान्यनुसन्ततानि | adhaśca mūlānyanusantatāni |
| कर्मानुबन्धीनि मनुष्यलोके॥ २॥ | karmānubandhīni manuṣyaloke. (2) |
| न रूपमस्येह तथोपलभ्यते | na rūpamasyeha tathopalabhyate |
| नान्तो न चादिर्न च सम्प्रतिष्ठा। | nānto na cādirna ca sampratiṣṭhā, |
| अश्वत्थमेनं सुविरूढमूलम् | aśvatthamenaṁ suvirūḍhamūlam |
| असङ्गशस्त्रेण दृढेन छित्त्वा॥ ३॥ | asaṅgaśastreṇa dṛḍhena chittvā. (3) |

ततः पदं तत्परिमार्गितव्यं
यस्मिन्गाता न निवर्तन्ति भूयः।
तमेव चाद्यं पुरुषं प्रपद्ये
यतः प्रवृत्तिः प्रसृता पुराणी ॥ ४॥

tataḥ padaṁ tatparimārgitavyaṁ
yasmingatā na nivartanti bhūyaḥ,
tameva cādyaṁ puruṣaṁ prapadye
yataḥ pravṛttiḥ prasṛtā purāṇī. (4)

निर्मानमोहा जितसङ्गदोषाः
अध्यात्मनित्या विनिवृत्तकामाः।
द्वन्द्वैर्विमुक्ताः सुखदुःखसञ्ज्ञैः
गच्छन्त्यमूढाः पदमव्ययं तत्॥ ५॥

nirmānamohā jitasaṅgadoṣāḥ
adhyātmanityā vinivṛttakāmāḥ,
dvandvairvimuktāḥ sukhaduḥkhasañjñaiḥ
gacchantyamūḍhāḥ padamavyayaṁ tat. (5)

न तद्भासयते सूर्यः
न शशाङ्को न पावकः।
यद्गत्वा न निवर्तन्ते
तद्धाम परमं मम॥ ६॥

na tadbhāsayate sūryaḥ
na śaśāṅko na pāvakaḥ,
yadgatvā na nivartante
taddhāma paramaṁ mama. (6)

ममैवांशो जीवलोके
जीवभूतः सनातनः।
मनःषष्ठानीन्द्रियाणि
प्रकृतिस्थानि कर्षति॥ ७॥

mamaivāṁśo jīvaloke
jīvabhūtaḥ sanātanaḥ,
manaḥṣaṣṭhānīndriyāṇi
prakṛtisthāni karṣati. (7)

शरीरं यदवाप्नोति
यच्चाप्युत्क्रामतीश्वरः।
गृहीत्वैतानि संयाति
वायुर्गन्धानिवाशयात्॥ ८॥

śarīraṁ yadavāpnoti
yaccāpyutkrāmatīśvaraḥ,
gṛhītvaitāni saṁyāti
vāyurgandhānivāśayāt. (8)

| | |
|---|---|
| श्रोत्रं चक्षुः स्पर्शनं च | śrotraṁ cakṣuḥ sparśanaṁ ca |
| रसनं घ्राणमेव च। | rasanaṁ ghrāṇameva ca, |
| अधिष्ठाय मनश्चायं | adhiṣṭhāya manaścāyaṁ |
| विषयानुपसेवते॥ ९॥ | viṣayānupasevate. (9) |
| उत्क्रामन्तं स्थितं वापि | utkrāmantaṁ sthitaṁ vāpi |
| भुञ्जानं वा गुणान्वितम्। | bhuñjānaṁ vā guṇānvitam, |
| विमूढा नानुपश्यन्ति | vimūḍhā nānupaśyanti |
| पश्यन्ति ज्ञानचक्षुषः॥ १०॥ | paśyanti jñānacakṣuṣaḥ. (10) |
| यतन्तो योगिनश्चैनं | yatanto yoginaścainaṁ |
| पश्यन्त्यात्मन्यवस्थितम्। | paśyantyātmanyavasthitam, |
| यतन्तोऽप्यकृतात्मानः | yatanto'pyakṛtātmānaḥ |
| नैनं पश्यन्त्यचेतसः॥ ११॥ | nainaṁ paśyantyacetasaḥ. (11) |
| यदादित्यगतं तेजः | yadādityagataṁ tejaḥ |
| जगद्भासयतेऽखिलम् । | jagadbhāsayate'khilam, |
| यच्चन्द्रमसि यच्चाग्नौ | yaccandramasi yaccāgnau |
| तत्तेजो विद्धि मामकम्॥ १२॥ | tattejo viddhi māmakam. (12) |
| गामाविश्य च भूतानि | gāmāviśya ca bhūtāni |
| धारयाम्यहमोजसा। | dhārayāmyahamojasā, |
| पुष्णामि चौषधीः सर्वाः | puṣṇāmi cauṣadhīḥ sarvāḥ |
| सोमो भूत्वा रसात्मकः॥ १३॥ | somo bhūtvā rasātmakaḥ. (13) |

अहं वैश्वानरो भूत्वा
प्राणिनां देहमाश्रितः।
प्राणापानसमायुक्तः
पचाम्यन्नं चतुर्विधम्॥ १४॥

ahaṁ vaisvānaro bhūtvā
prāṇinām dehamāśritaḥ,
prāṇāpānasamāyuktaḥ
pacāmyannaṁ caturvidham. (14)

सर्वस्य चाहं हृदि सन्निविष्टः
मत्तः स्मृतिर्ज्ञानमपोहनं च।
वेदैश्च सर्वैरहमेव वेद्यः
वेदान्तकृद्वेदविदेव चाहम्॥ १५॥

sarvasya cāhaṁ hṛdi sanniviṣṭaḥ
mattaḥ smṛtirjñānamapohanaṁ ca,
vedaiśca sarvairahameva vedyaḥ
vedāntakṛdvedavideva cāham. (15)

द्वाविमौ पुरुषौ लोके
क्षरश्चाक्षर एव च।
क्षरः सर्वाणि भूतानि
कूटस्थोऽक्षर उच्यते॥ १६॥

dvāvimau puruṣau loke
kṣaraścākṣara eva ca,
kṣaraḥ sarvāṇi bhūtāni
kūṭastho'kṣara ucyate. (16)

उत्तमः पुरुषस्त्वन्यः
परमात्मेत्युदाहृतः।
यो लोकत्रयमाविश्य
बिभर्त्यव्यय ईश्वरः॥ १७॥

uttamaḥ puruṣastvanyaḥ
paramātmetyudāhṛtaḥ,
yo lokatrayamāviśya
bibhartyavyaya īśvaraḥ. (17)

यस्मात्क्षरमतीतोऽहं
अक्षरादपि चोत्तमः।
अतोऽस्मि लोके वेदे च
प्रथितः पुरुषोत्तमः॥ १८॥

yasmātkṣaramatīto'haṁ
akṣarādapi cottamaḥ,
ato'smi loke vede ca
prathitaḥ puruṣottamaḥ. (18)

| | |
|---|---|
| यो मामेवमसम्मूढः | yo māmevamasammūdhaḥ |
| जानाति पुरुषोत्तमम्। | jānāti puruṣottamam, |
| स सर्वविद्भजति मां | sa sarvavidbhajati māṁ |
| सर्वभावेन भारत ॥ १९॥ | sarvabhāvena bhārata. (19) |
| इति गुह्यतमं शास्त्रं | iti guhyatamaṁ śāstram |
| इदमुक्तं मयानघ। | idamuktaṁ mayānagha, |
| एतद्बुद्ध्वा बुद्धिमान्स्यात् | etadbuddhvā buddhimānsyāt |
| कृतकृत्यश्च भारत॥ २०॥ | kṛtakṛtyaśca bhārata. (20) |
| ॐ तत्सत् इति श्रीमद्भगवद्गीतासु | om tatsat iti śrīmadbhagavadgītāsu |
| उपनिषत्सु ब्रह्मविद्यायां | upaniṣatsu brahmavidyāyāṁ |
| योगशास्त्रे श्रीकृष्णार्जुन संवादे | yogaśāstre śrīkṛṣṇārjuna samvāde |
| पुरुषोत्तमयोगो नाम पञ्चदशोऽध्यायः | puruṣottamayogo nāma pañcadaśo’dhyāyaḥ |